स्तोत्ररत्नं (आलवन्दार)

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥

नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥

नमो यामुनपादाब्जरेणुभिः पावितात्मने ।
विदिताखिल वेद्याय गुरवे विदितात्मने ॥

नमोऽचिन्त्याद्भुताक्लिष्ट ज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ १॥

तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्व-
ज्ञानानुरागमहिमातिशयान्तसीम्ने ।
नाथाय नाथमुनयेऽत्र परत्र चापि
नित्यं यदीयचरणौ शरणं मदीयम् ॥ २॥

भूयो नमोऽपरिमिताच्युतभक्तितत्त्व-
ज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः ।
लोकेऽवतीर्णपरमार्थसमग्रभक्ति-
योगाय नाथमुनये यमिनां वराय ॥ ३॥

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-
भोगापवर्गतदुपायगतीरुदारः ।
सन्दर्शयन्निरममीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ॥ ४॥

माता पिता युवतयस्तनया विभूति-
स्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ५॥

यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मि-
न्नस्मन्मनोरथपथस्सकलस्समेति ।
स्तोष्यामि नः कुलधनं कुलदैवतं त-
त्पादारविन्दमरविन्दविलोचनस्य ॥ ६॥

तत्त्वेन यस्य महिमार्णवशीकराणु-
श्शक्यो न मातुमपि शर्वपितामहाद्यैः ।
कर्तुं तदीयमहिमस्तुतिमुद्यताय
मह्यं नमोऽस्तु कवये निरपत्रपाय ॥ ७॥

यद्वा श्रमावधि यथामति वाप्यशक्त-
स्स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ।
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः
को मज्जतोरणुकुलाचलयोर्विशेषः ॥ ८॥

किञ्चैष शक्त्यतिशयेन न तेऽनुकम्प्य-
स्स्तोतापि तु स्तुतिकृतेन परिश्रमेण ।
तत्र श्रुमस्तु सुलभो मम मन्दबुद्धे-
रित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ ९॥

नावेक्षसे यदि ततो भुवनान्यमूनि
नालं प्रभो भवितुमेव कुतः प्रवृत्तिः ।
एवं निसर्गसुहृदि त्वयि सर्वजन्तो-
स्स्वामिन्विचित्रमिदमाश्रितवत्सलत्वम् ॥ १०॥

स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण त्वयि न मृष्यति वैदिकः कः ।
ब्रह्मा शिवश्शतमखः परमस्वराडि-
त्येतेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ ११॥

कश्श्रीश्श्रियः परमसत्त्वसमाश्रयः कः
कः पुण्डरीकनयनः पुरुषोत्तमः कः ।
कस्यायुतायुतशतैककलांशकांशे
विश्वं विचित्रचिदचित्प्रविभागवृत्तम् ॥ १२॥

वेदापहारगुरुपातकदैत्यपीडा-
द्यापद्विमोचनमहिष्ठफलप्रदानैः ।
कोऽन्यः प्रजापशुपती परिपाति कस्य
पादोदकेन स शिवस्स्वशिरोधृतेन ॥ १३॥

कस्योदरे हरविरिञ्चिमुखः प्रपञ्चः
को रक्षतीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः
कः केन वैष परवानिति शक्यशङ्कः ॥ १४॥

त्वां शीलरूपचरितैः परमप्रकृष्ट-
सत्त्वेन सात्विकतया प्रबलैश्च शास्त्रैः ।
प्रख्यातदैवपरमार्थविदां मतैश्च
नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥ १५॥

उल्लङ्घितत्रिविधसीमसमातिशायि-
सम्भावनं तव परिव्रढिमस्वभावम् ।
मायाबलेन भवताऽपि निगूह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥ १६॥

यदण्डमण्डान्तरगोचरं च यद्
दशोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परम्पदं
परात्परं ब्रह्म च ते विभूतयः ॥ १७॥

वशी वदान्यो गुणवानृजुश्शुचि-
र्मृदुर्दयालुर्मधुरस्स्थिरस्समः ।
कृती कृतज्ञस्त्वमसि स्वभावत-
स्समस्तकल्याणगुणामृतोदधिः ॥ १८॥

उपर्युपर्यब्जभुवोऽपि पूरुषा-
न्प्रकल्प्य ते ये शतमित्यनुक्रमात् ।
गिरस्त्वदेकैकगुणावधीप्सया
सदास्थिता नोद्यमतोऽतिशेरते ॥ १९॥

त्वदाश्रितानां जगदुद्भवस्थिति
प्रणाशसंसारविमोचनादयः ।
भवन्ति लीलाविधयश्च वैदिका
स्त्वदीयगम्भीरमनोऽनुसारिणः ॥ २०॥

नमो नमो वाङ्मनसातिभूमये
नमो नमो वाङ्मनसैकभूमये ।
नमो नमोऽनन्तमहाविभूतये
नमो नमोऽनन्तदयैकसिन्धवे ॥ २१॥

न धर्मनिष्ठोऽस्मि न चात्मवेदी
न भक्तिमांस्त्वच्चरणारविन्दे ।
अकिञ्चनोऽनन्यगतिश्शरण्य
त्वत्पादमूलं शरणं प्रपद्ये ॥ २२॥

न निन्दितं कर्म तदस्ति लोके
सहस्रशो यन्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द
क्रन्दामि सम्प्रत्यगतिस्तवाग्रे ॥ २३॥

निमज्जतोऽनन्तभवार्णवान्त-
श्चिराय मे कूलमिवासि लब्धः ।
त्वयापि लब्धं भगवन्निदानीम-
नुत्तमं पात्रमिदं दयायाः ॥ २४॥

अभूतपूर्वं मम भावि किं वा
सर्वं सहे मे सहजं हि दुःखम् ।
किन्तु त्वदग्रे शरणागतानां
पराभवो नाथ न तेऽनुरूपः ॥ २५॥

निरासकस्यापि न तावदुत्सहे
महेश हातुं तव पादपङ्कजम् ।
रूषा निरस्तोऽपि शिशुस्स्तनन्धयो
न जातु मातुश्चरणौ जिहासति ॥ २६॥

तवामृतस्यन्दिनि पादपङ्कजे
निवेशितात्मा कथमन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्दनिर्भरे
मधुव्रतो नेक्षुरकं हि वीक्षते ॥ २७॥

त्वदङ्घ्रिमुद्दिश्य कदापि केनचि-
द्यथा तथा वाऽपि सकृत्कृतोऽञ्चलिः ।
तदैव मुष्णात्यशुभान्यशेषत-
श्शुभानि पुष्णाति न जातु हीयते ॥ २८॥

उदीर्णसंसारदवाशुशुक्षणिम्
क्षणेन निर्व्याप्य परां च निर्वृतिम् ।
प्रयच्छति त्वच्चरणारुणाम्बुज-
द्वयानुरागामृतसिन्धुशीकरः ॥ २९॥

विलासविक्रान्तपरावरालयं-
नमस्यदार्तिक्षपणे कृतक्षणम् ।
धनं मदीयं तव पादपङ्कजं
कदा नु साक्षात्करवाणि चक्षुषा ॥ ३०॥

कदा पुनश्शङ्खरथाङ्गकल्पक
ध्वजारविन्दाङ्कुशवज्रलाञ्छनम् ।
त्रिविक्रम त्वच्चरणाम्बुजद्वयं-
मदीयमूर्धानमलङ्करिष्यति ॥ ३१॥

विराजमानोज्ज्वलपीतवाससं
स्मितातसीसूनसमामलच्छविम् ।
निमग्ननाभिं तनुमध्यमुन्नतं
विशालवक्षस्स्थलशोभिलक्षणम् ॥ ३२॥

चकासतं ज्याकिणकर्कशैश्शुभै-
श्चतुर्भिराजानुविलम्बिभिर्भुजैः ।
प्रियावतंसोत्पलकर्णभूषण-
श्लथालकाबन्धविमर्दशंसिभिः ॥ ३३॥

उदग्रपीनांसविलम्बिकुण्डला-
लकावलीबन्धुरकम्बुकन्धरम् ।
मुखश्रिया न्यक्कृतपूर्णनिर्मला-
मृतांशुबिम्बाम्बुरुहोज्ज्वलश्रियम् ॥ ३४॥

प्रबुद्धमुग्धाम्बुजचारुलोचनं
सविभ्रमभ्रूलतमुज्ज्वलाधरम् ।
शुचिस्मितं कोमलगण्डमुन्नसं
ललाटपर्यन्तविलम्बितालकम् ॥ ३५॥

स्फुरत्किरीटाङ्गदहारकण्ठिका
मणीन्द्रकाञ्जीगुणनूपुरादिभिः ।
रथाङ्गशङ्खासिगदाधनुर्वरै-
र्लसत्तुलस्यावनमालयोज्ज्वलम् ॥ ३६॥

चकर्थ यस्या भवनं भुजान्तरं
तव प्रियं धाम यदीयजन्मभूः ।
जगत्समस्तं यदपाङ्गसंश्रयं
यदर्थमम्भोधिरमन्थ्यबन्धि च ॥ ३७॥

स्ववैश्वरूप्येण सदाऽनुभूतया
प्यपूर्ववद्विस्मयमादधानया ।
गुणेन रूपेण विलासचेष्टितै
स्सदा तवैवोचितया तव श्रिया ॥ ३८॥

तया सहासीनमनन्तभोगिनि
प्रकृष्टविज्ञानबलैकधामनि ।
फणामणित्रातमयूखमण्डल
प्रकाशमानोदरदिव्यधामनि ॥ ३९॥

निवासशय्यासनपादुकांशुको-
पधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतां गतै-
र्यथोचितं शेष इतीर्यते जनैः ॥ ४०॥

दासस्सखा वाहनमासनं ध्वजो
यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता
त्वदङ्घ्रिसम्मर्दकिणाङ्कशोभिना ॥ ४१॥

त्वदीयभुक्तोज्झितशेषभोजिना
त्वया निवृष्टात्मभरेण यद्यथा ।
प्रियेण सेनापतिना न्यवेदि तत्त-
थाऽनुजानन्तमुदारवीक्षणैः ॥ ४२॥

हताखिलक्लेशमलैस्स्वभावत
स्सदानुकूल्यैकरसैस्तवोचितैः ।
गृहीततत्तत्परिचारसाधनै
र्निषेव्यमाणं सचिवैर्यथोचितम् ॥ ४३॥

अपूर्वनानारसभावनिर्भर
प्रबद्धया मुग्धविदग्धलीलया ।
क्षणाणुवत्क्षिप्तपरादिकालया
प्रहर्षयन्तं महिषीं महाभुजम् ॥ ४४॥

अचिन्त्यदिव्याद्भुतनित्ययौवन
स्वभावलावण्यमयामृतोदधिम् ।
श्रियश्श्रियं भक्तजनैकजीवितं
समर्थमापत्सस्खमर्थिकल्पकम् ॥ ४५॥

भवन्तमेवानुचरन्निरन्तर
प्रशान्तनिश्शेषमनोरथान्तरः ।
कदाहमैकान्तिकनित्यकिङ्करः
प्रहर्षयिष्यामि सनाथजीवितः ॥ ४६॥

धिगशुचिमविनीतं निर्दयं मामलज्जं
परमपुरुष योऽहं योगिवर्याग्रगण्यैः ।
विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं
तव परिजनभावं कामये कामवृत्तः ॥ ४७॥

अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ ४८॥

अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि ।
भगवन्भवदुर्दिने पथस्खलितं मामवलोकयाच्युत ॥ ४९॥

न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः ।
यदि मे न दयिष्यसे ततो दयनीयस्तव नाथ दुर्लभः ॥ ५०॥

तदहं त्वदृते न नाथवान्मदृते त्वं दयनीयवान्न च ।
विधिनिर्मितमेतदन्यं भगवन्पालय मा स्म जिह्वया ॥ ५१॥

वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथा तथा विधः ।
तदयं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥ ५२॥

मम नाथ यदस्ति योऽस्म्यहं सकलं तद्धि तवैव माधव ।
नियतस्वमिति प्रबुद्धधीरथवा किन्नु समर्पयामि ते ॥ ५३॥

अवबोधितवानिमां यथा
मयि नित्यां भवदीयतां स्वयम् ।
कृपयैवमनन्यभोग्यतां
भगवन्भक्तिमपि प्रयच्छ मे ॥ ५४॥

तवदास्यसुखैकसङ्गिनां
भवनेष्वस्त्वपि कीटजन्म मे ।
इतरावसथेषु मास्म भूद-
पि मे जन्म चतुर्मुखात्मना ॥ ५५॥

सकृत्त्वदाकारविलोकनाशया
तृणीकृतानुत्तमभुक्तिमुक्तिभिः ।
महात्मभिर्मामवलोक्यतां नय
क्षणेऽपि ते यद्विरहोऽतिदुस्सहः ॥ ५६॥

न देहं न प्राणान्न च सुखमशेषाभिलषितं
न चात्मानं नान्यत्किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ क्षणमपि सहे यातु शतथा
विनाशं तत्सत्यं मधुमथन विज्ञापनमिदम् ॥ ५७॥

दुरन्तस्यानादेरपरिहरणीयस्य महतो
विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ।
दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे ।
तव स्मारं स्मारं गुणगणमितीच्छामि गतभीः ॥ ५८॥

अनिच्छन्नप्येवं यदि पुनरितीच्छन्निव रज-
स्तमश्छन्नच्छद्मस्तुतिवचनभङ्गीमरचयम् ।
तथापीत्थं रूपं वचनमवलम्ब्यापि कृपया
त्वमेवैवं भूतं धरणिधर मे शिक्षय मनः ॥ ५९॥

पिता त्वं माता त्वं दयित तनयस्त्वं प्रियसुहृ-
त्त्वमेव त्वं मित्रं गुरुरसि गतिश्चासि जगताम् ।
त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं
प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥ ६०॥

जनित्वाऽहं वंशे महति जगति ख्यातयशसां
शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ।
निसर्गादेव त्वच्चरणकमलैकान्तमनसा-
मधोधः पापात्मा शरणद निमज्जामि तमसि ॥ ६१॥



अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः
कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्टः कथमहमितो दुःखजलधे-
रपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥ ६२॥

रघुवर यदभूस्त्वं तादृशो वायसस्य
प्रणत इति दयालुर्यच्च चैद्यस्य कृष्णः ।
प्रतिभवमपराद्धुर्मुग्धसायुज्यदोऽभू-
र्वद किमपदमागस्तस्य तेऽस्ति क्षमायाः ॥ ६३॥

ननु प्रपन्नस्सकृदेव नाथ तवाहमस्मीति च याचमानः ।
तवानुकम्प्यस्स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं ते ॥ ६४॥

अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥ ६५॥

यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयां नमामितम् ॥ ६६॥

॥ इति श्रीमद्यामुनमुनिविरचितं स्तोत्ररत्नं सम्पूर्णम् ॥

Created by www.onlinesanskritbooks.com